# श्रुतिनिश्श्वसिता

(वेदविज्ञानविषयणी राष्ट्रिया शोधपत्रिका)
(NATIONAL RESEARCH JOURNAL OF VEDIC SCIENCES)
प्रथमोङ्कः, मार्चः-२०१६



प्रधानसम्पादकः
प्रो. सुरेन्द्रपाठकः
प्राचार्यः

सम्पादकः
डॉ. नीरजतिवारी

## वेदविभागः
## राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )
"नैकद्वारा 'ए' श्रेण्या प्रत्यायितः"
( मानवसंसाधनविकासमंत्रालयाधीनः भारतसर्वकार )
लखनऊपरिसरः
विशालखण्डः ४, गोमतीनगरम् लखनऊ-२२६०१०

# वेदाध्ययनस्य वैदिकयज्ञानां च विस्तारोपायाः

प्रो० मुरलीमनोहरपाठकः*

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।
गङ्गा भाति जटासु यस्य सततं चन्द्रस्तथा मस्तके। नागश्चापि गले मनोरमतया कण्ठे विषं राजते।
नन्दी यस्य च वाहनं शुभकरं शूलं दुरात्मान्तकृद्। भक्तिर्यस्य च धामदा सुविमला काशीपतिं तं नुमः।।
माघमासेऽसिते पक्षे ह्यष्टम्यां चन्द्रवासरे। पुरे लखनऊनाम्नि संस्थानस्याग प्राङ्गणे।।
के सन्ति विस्तरोपाया वेदाध्ययनयागयोः। एवं विषयमाश्रित्य सङ्गोष्ठीयं प्रवर्तिता।।
सुरेन्द्राः पाठकाश्चापि वैयाकरणतत्त्वज्ञाः। उद्घाटनविधेरस्य सादस्यत्वं वहन्त्यमी।।
श्रीमनोजकुमाराख्या मिश्रोपाह्वा विपश्चितः। सारस्वतातिथित्वेन ते लसन्त्यत्र साम्प्रतम्।।
श्रीलक्ष्मीश्वरसंज्ञा ये झोपाह्वा वेदपारगाः। मुख्यवक्तृस्वरूपेण विराजन्ते मुदान्विताः।।
संयोजकवरो योऽस्ति तिवारी नीरजाभिधः। व्यापृतो नैककार्येषु तथा चाऽत्रापि तत्परः।।
अन्ये चापि महीयांसो विद्वांसः समुपागताः। समागतेभ्यः सर्वेभ्यो व्याहरामि नमो नमः।।

वेदो नाम विश्ववाङ्मयस्य प्राचीनतमो निधिविशेषः। ज्ञान-विचारण-सत्ता-लाभादिचतुर्ष्वर्थेषु पठिताद् विद्धातो-घञ्प्रत्यये कृते निष्पन्नोऽयं वेद शब्दो नानार्थकः। ज्ञानार्थकाद् विदः करणे घञि कृते वेदा ज्ञानसाधनरूपेण प्रतिष्ठिताः किन्तु भावे कृते ते साक्षाद् ज्ञानरूपा एव। स्वामी दयानन्दः सरस्वती वेदस्य विविधानार्थानेवं स्फुटीकरोति - विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति अथवा विन्दन्ते लभन्ते विन्दन्ति विचारयन्ति सर्वे मनुष्याः सत्यविद्यां येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः।[1] वेदानामनुशीलनेन स्पष्टमिदं प्रतिभाति यत्तत्र विविधज्ञानविज्ञानानां राशिर्वर्तते। वेदाः खलु भारतीयसंस्कृतेः स्तम्भरूपाः कार्याकार्यज्ञापकाः शुभाशुभोपदेष्टारो जीवनदर्शनस्य शिक्षका निखिलस्यापि विश्वस्य हितसाधकाश्चतुर्वर्गप्रादयै सोपानभूताश्च सन्ति। एकतो वेदानां धार्मिकं महत्त्वमपरतश्च सांस्कृतिकमहत्त्वमपि वर्तते। एवमेव तेषां शास्त्रीयं, नैतिकं, सामाजिकमार्थिकं राजनीतिकं भाषावैज्ञानिकमैतिहासिकं किं बहुना काव्यशास्त्रीयं साहित्यिकं चापि महत्त्वं सर्वमङ्गीक्रियते। एवं वेदाध्ययनं समग्रमपि मानवजीवनं पवित्रं करोति चिन्ता-ग्रस्तमिदं जगद् चिन्तामुक्तं करोति सकलानामपि समस्यानां समुचितं समाधानं निर्दिशति जीवने सर्वविधोन्नतिं विदधाति सर्वत्र सद्भावं च स्थापयति।

एतादृशो वेदः कथमस्माभिरध्येतव्य इति जिज्ञासमानेन तत्र भगवता वेदभाष्यकारेण सायणाचार्येणाप्येव मुक्तम् **'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः'**। अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते। अनुभूयमानस्य स्रक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्वम्, औषधादेरनिष्टपरिहारहेतुत्वं, च प्रत्यक्षतः सिद्धम्, स्वेनानुभविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमानगम्यम्। एवं तर्हि भाविजन्मगतमप्यनुमानगम्यमिति चेत्, न तद्विशेषस्यानवगमात्। न खलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः, कलञ्जभक्षणवर्जनादिरनिष्टपरिहार हेतुरित्यमुमर्थं वेदव्यतिरेकेणानुमानसहस्रेणापि तार्किकशिरोमणिरभ्यवगन्तुं शक्नोति, तस्माद् अलौकिकोपायबोधको वेद इति लक्षणस्य नातिव्याप्तिः।[2] सायणाचार्यस्य वाक्यैरेभिरिदं सुस्पष्टं भवति, यद् वेदज्ञानमपरिहार्यम्। सम्प्रति महनीयानामेतेषां वेदानां तादृशमध्ययनमध्यापनं च न भवति यादृशं पुरातनकाले भवति स्म। इदानीं जनाः कथं वेदाध्ययनविमुखा जाता इत्यस्ति चिन्ताविषयः। एतस्याश्चिन्ताया निराकरणार्थं सर्वप्रथममिदमेवावश्यकं यद् जना वेदानां महत्त्वेनोपयोगित्वेन च अभिज्ञा भवन्तु। एतत्कृते ग्रामे ग्रामे, नगरे-नगरे एतादृशी शिक्षा प्रचारयितव्या। यदि जना वेदानां महत्त्वं सम्यग् ज्ञास्यन्ति तदा ते तेषामध्ययनेऽपिलग्ना भविष्यन्ति। वेदाध्ययनविस्तारस्य प्रसारस्य च द्वितीय उपाय अयं भवितुमर्हति यद् वेदस्थलोकोपयोगिमन्त्राणां सरलराष्ट्रभाषायां लोकभाषासु वा भाषान्तरं क्रियताम्। एतेन जना वेदनिहितगम्भीरज्ञानेनपरिचिता भविष्यन्ति वेदाध्ययने प्रवृत्ताश्चापि भविष्यन्ति। वेदाध्ययनविस्तारस्य अपरः कश्चनोपाय अयमपि निर्दिष्टुं शक्यते यत् वेदस्वाध्यायाय यावन्महत्त्वं दीयते तावदेव महत्त्वं वेदार्थज्ञानायापि देयम्। अनेन जनाः वेदमन्त्रतः तत्स्वार्थेन च परिचिताः सन्तः तेषां स्वकीयजीवने प्रयोगं करिष्यन्ति। वेदार्थज्ञानस्य महिमा यास्केन एवमुपवर्णितः

*संस्कृतप्राकृतभाषाविभागः, दीनदयाल-उपाध्यायगोरखपुरविश्वविद्यालयः गोरखपुरम्

**"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।"**

योजनः वेदमधीत्य वेदार्थं न जानाति स वाचं पश्यन्नपि न पश्यति। सः अर्थज्ञानराहित्येन शृण्वन्नपि किञ्चिदपि न शृणोति। अपरतश्च यः वेदार्थं जानाति तं प्रति वाक् स्वकीयं सकलमपि स्वरूपं स्वयमेव प्रकटयति, यथा ऋतुस्नाता पतिं कामयमाना च जाया शुभ्रवस्त्रोपैता सती स्वकीयं सकलमपि शरीरं पत्ये अनावृतं करोति। तद्यथा -

**उत त्वः पश्यन्न ददर्श वाचमुतत्वः शृण्वन्न शृणोत्येनाम्। उतोत्वस्मै तन्वं विसस्रे जायेव पत्य उशतीसुवासाः।।"**

एतादृशानां मन्त्राणामर्थैश्वगता जना अवश्यमेव वेदाध्ययनं करिष्यन्तीति नात्र संशीतिलेशोऽपि विद्यते।

यज् देवपूजासङ्गतिकरणदानेषु इति धातोर्भावे नङ्प्रत्यये कृते यज्ञशब्दो निष्पद्यते। धातुजन्मार्थानुसारेण देवपूजनम् ऋष्यादीनां सङ्गतिकरणं दानञ्चेति यज्ञान्तर्गतानि। मत्स्यपुराणनुसारेण यस्मिन् कर्मविशेषे देवता-हविर्योग्यं द्रव्यं वैदिकसंहिता, ऋत्विजो दक्षिणेति पञ्चानां संयोगो भवति स यज्ञः। वचनमेवमस्ति-

**देवानां द्रव्यहविषां ऋक्सामयजुषां तथा। ऋत्विजां दक्षिणानाञ्च संयोगो यज्ञ उच्यते।।५**

तैत्तिरीयसंहितायां स्पष्टमेवोक्तं वर्तते यद् ब्राह्मणा, क्षत्रिया वैश्या च जन्मग्रहणानन्तरमेव देवर्षिपितृरूपऋणत्रयेण युक्ता भवन्ति। ते ब्रह्मचर्यानुपालनेन ऋषिऋणाद्यज्ञानुष्ठानेन देवऋणात्सन्तानोत्पत्तिद्वारेण च पितृऋणान्मुक्ता भवन्तीति। अतो यज्ञोऽयं देवऋणान्मुक्तेर्हेतुत्वेन वर्तते। श्रीमद्भगवद्गीतायां भगवता वासुदेवेन यज्ञदानतपोरूपकर्मत्रयं सततमेव करणीयं प्रतिपादितम्। एतेषां त्रयाणां त्यागः कथमपि न करणीयः। एतानि खलु मनीषिणोऽपि पावयन्ति का कथा मनुष्याणाम्। यथा -

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।। ६**

तत्रैव इदमपि प्रतिपादितं यद् यज्ञातिरिक्तकर्मसु संलग्नो मानवः कर्मबाधने पतति। अत एवानासक्तेन मनसा यज्ञार्थं कर्म सम्पादनीयम् - **यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।।७**

ऋग्वेदीयपुरुषसूक्तानुसारेण (ऋ१०/९०) समग्रापि सृष्टिर्यज्ञमयी। सृष्ट्यारम्भे प्रजापतिः प्रजाः सृष्ट्वा ताः यज्ञसम्पादनार्थं प्रेरितवान्। तेन निर्दिष्टं यद् यज्ञेनानेन देवान्, वृद्धिं नयत् ते प्रसन्ना देवा अपि युष्मान् इष्टान् विधास्यन्ति। एवं देवैः सह मानवानां सम्बन्धो यज्ञेन पुष्टिं याति, यज्ञश्च मानवविकासस्य हेतुः। यथोक्तं गीतायाम्-

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष्वोऽस्त्विष्टकामधुक्।।**

**देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।।८**

लोके यदि यज्ञो न भविष्यति, तर्हि जीवानां भक्षणार्थं किमपि उपलब्धं नैव भविष्यति। प्राणिनां पुष्ट्यर्थं अन्नस्यावश्यकता भवति, अन्नं पर्जन्यद्वारा वृष्टिप्रदानेन भवति, पर्जन्यस्य निर्माणं यज्ञधूमेन जायते, यज्ञः कर्मणा जायते, कर्म ब्रह्मणोद्भूत, ब्रह्म अर्थात् वेदः अक्षरादविनाशिपरमात्मनो ज्ञातः एव सर्वव्यापकः परमात्मा यज्ञ एव प्रतिष्ठितो वर्तते। अतः यज्ञद्वारेण परमात्मनोऽपि सपर्या जायते, येन समग्राऽपि सृष्टिः सृष्टा। एवं यज्ञः सकलेऽपि ब्रह्माण्डे व्याप्तो वर्तते। उक्तं च गीतायाम् -

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।**

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।।९**

यज्ञेन लौकिकी पारलौकिकी चेत्युभयाविधोन्नतिर्जायते। यज्ञरहितपुरुषस्य कृते मनुष्यलोकोऽप्ययं सुखकरो न भवति का कथा परलोकस्य। तथ्यमिदं भगवता वासुदेवेन गीतायामेवं प्रत्यपादि-

**नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम्।१०** ऐतरेयब्राह्मणे **यज्ञस्य पञ्चभेदानिर्दिष्टाः 'स एष यज्ञः पञ्चविधाः - अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः इति।'**

गौतममतानुसारेण पाकयज्ञा हविर्यज्ञाः सोमयज्ञाश्चेति त्रिप्रकारका यज्ञा भवन्ति। तत्रापि प्रत्येकं यज्ञः सप्तप्रकारको भवति। एवं साकल्येन एकविंशतिसंख्याका यज्ञा भवन्तीति। एतेषु पाकयज्ञानां विवरणं गृह्यसूत्रेषु धर्मसूत्रेषु च उपलभ्यते, हविर्यज्ञानां सोमयज्ञानाञ्च विवरणं कात्यायनादिश्रौतसूत्रेषु दृष्टिपथमायाति। पाकयज्ञा स्मार्तयज्ञा भवन्ति तथा शिष्टा अन्ये चतुर्दशसंख्याकाः श्रौतयज्ञरूपेण प्रसिद्धाः सन्ति। एतेषां समेषां यज्ञानां गणना एवं कृता औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिकश्राद्धम्, श्रवणा, शूलगव इति सप्त पाकयज्ञसंस्थाः। अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, पशुबन्धः, सौत्रामणी, *पिण्डपितृयज्ञादयो* दर्विहोमा *इति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमः*, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्त सोमसंस्थाः।११ एतदतिरिक्तं गृह्यसूत्रेषु धर्मसूत्रेषु च पञ्चमहायज्ञानां निर्देश अवाप्यते। यथोक्तं मनुस्मृतौ-

अध्यापनं ब्रह्मयज्ञः पितृयज्ञोऽथ तर्पणम्। दैवो होमो बलिर्भौतो नृयज्ञोऽतिथिपूजनम ।।१२

एतेषु उपरिवर्णितेषु यज्ञेषु केचन नित्याः केचन नैमित्तिकाः केचन काम्याश्च सन्ति। नैमित्तिकानां काम्यानां च यज्ञानामनुष्ठानमाहर्तुरिच्छाधीनमस्ति, किन्तु नित्ययज्ञानामनुष्ठानं प्रत्येकं गृहस्थेन अवश्यमेव करणीयम्। पञ्चमहायज्ञा एव नित्ययज्ञरूपेण प्रसिद्धाः सन्ति। एतेषामनुष्ठानेन कोऽपि गृहस्थः पञ्चसूनाजन्यदोषैर्मुक्तो भवति। मनुस्मृतावेवमुदवर्णितम् -

पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।।
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः। पञ्चक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्।।१३

वस्तुतो वेदानामवतारः यज्ञनिष्पादनार्थमेवाभूत्। कर्मकाण्ड ज्ञानकाण्डमुपासनाकाण्डञ्चेति काण्डत्रये वेदषु कर्मकाण्डमेव प्रामुख्यं भजति। यज्ञानामनुष्ठानेनैव वेदाः सुरक्षिता भविष्यन्ति। वेदाङ्गज्यौतिषे वेदानां प्रयोजनं यज्ञ एव- 'वेदा हि यज्ञार्थमभिप्रवृत्ताः ।।१४

श्रीमद्भागवत्महापुराणे सात्विकयज्ञा भगवत्स्वरूपा एव उपवर्णिताः। तयोक्तं यद् यस्य राज्ञो राज्ये नगरे वा वर्णाश्रमा ामिभिर्यज्ञपुरुषस्य अर्चनं भवति, तस्मै भगवान् प्रसीदति। भगवति प्रसन्ने जाते जगत्स्वामिन् किञ्चिदपि अलभ्यं न भवति। तद्यथा-

यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपुरुषः। इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः।।
तस्य राज्ञो महाभाग भगवान् भूतभावनः। परितुष्यति विश्वात्मा तिष्ठतो निजशासने।।
तस्मिंस्तुष्टे किमप्राप्यं जगतामी वरे वरे।।१५

विष्णुपुराणेऽपि यज्ञानां महत्त्वं सम्यगुपवर्णितम्। तत्र प्रतिपादितं यद् यज्ञेन देवा आप्यायिताः तृप्ता वा भवन्ति। यज्ञमा यमेन वृष्टि द्वारा प्रजास्तृप्ता भवन्ति। एवं यज्ञा वै सर्वविधकल्याणहेतवः। यथा

यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः। आप्यायन्ते तु धर्मज्ञ यज्ञाः कल्याण हेतवः।।१६

कालिकापुराणेऽपि एतादृशमेव यज्ञमहत्त्वमुपलभ्यते -

यज्ञेषु देवास्तुष्यन्ति यज्ञे सर्वं प्रतिष्ठितम्। यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः।
अन्नेन् भूता जीवन्ति यज्ञे सर्वं प्रतिष्ठितम्। पर्जन्योजायते यज्ञात्सर्वं यज्ञमयं ततः।।१७

सम्पूर्णमपि जीवनं यज्ञमयम् -

यज्ञादेवाः प्रजाश्चैव यज्ञादन्ननियोगिनः। सर्वं यज्ञात्सदा भाति सर्वं यज्ञमयं जगत्।।१८

यज्ञानामुपरिलिखितं महत्त्वं तु अल्पमेव। अस्माकं शास्त्रेषु पुनर्यज्ञानां महन्महत्त्वं प्रख्यापितम्। इदानीमावश्यकताइयमेवास्ति यन्महत्त्वमिदं जनेषु प्रसारितं स्यात्। यज्ञानां महत्त्वेन अवगता जना अवश्यमेवैतेषामनुष्ठानं विधास्यन्ति। इहामुष्मिकोभयवि समुन्नतिहेतवे यज्ञानामनुष्ठानं सर्वैरेव कर्त्व्यम्। एवमेव वैदिकयज्ञाः प्रसारिताभवेयुः। एतेषां लाभमवाप्य जनाः पौनःपुन्येन सर्वविधानामपि यज्ञानामनुष्ठानं करिष्यन्तीति शम्।

सन्दर्भाः -


१. ऋग्वेदादिभाष्यभूमिका पृष्ठाङ्कः।
२. ऐतरेयब्राह्मणम्, सायणभाष्यम्, उपोद्घातप्रकरणम्, पृष्ठाङ्क
३. निरुक्तम्, १.६
४. ऋग्वेदः, १०.७१.४
५. मत्स्यपुराणम्,
६. श्रीमद्भगवद्गीता, १८.५
७. तत्रैव, ३.६.
८. तत्रैव, ३.१०-११.
९. तत्रैव, ३.१४-१५
१०. तत्रैव, ३.३१
११. गौतमधर्मसूत्रम्, ८.१८
१२. मनुस्मृतिः, ३.७०
१३. तत्रैव, ४.३२
१४. वेदाङ्गज्यौतिषम् (याजुषम्)३
१५. श्रीमद्भागवतम्, ४.१४.१८-२०
१६. विष्णुपुराणम्, २.१७४
१७. कालिकापुराणम्, ३२.७-८
१८. तत्रैव, ३१.४०